# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–शास्त्री (SEM-1) | **प्रश्नपत्रम्–६** (New & Old) | **गुणा:** – ७० |
| **विषय:** – पुराणेतिहास: | **कोड- CC- 1-1-2** | **समय:** – २ त: ५ |
| **दिनाङ्क:** – २०/१२/२०१८ | **सन्दर्भग्रन्थ:**– वाल्मीकीयरामायणे सुन्दरकाण्ड: सर्ग:– १–३४ | |

---

**॥ प्रथमान्विति: ॥**

**प्र–१ कयोरपि द्वयो: श्लोकयो: ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । १०**

१. मन: समाधाय तु शीघ्रगामिनं दुरासदं मारुततुल्यगामिनम् ।
महात्मनां पुण्यकृतां मदर्द्धिनां यशस्विनामग्र्यमुदामिवालयम् ॥

२. हंसो यथा राजतपञ्जरस्थ: सिंहो यथा मन्दरकन्दरस्थ: ।
वीरो यथा गर्वितकुञ्जरस्थश्चन्द्रोऽपिबभ्राज तथाम्बरस्थ: ॥

३. सूर्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुति: ।
वृषदंशकमात्रोऽथ बभूवाद्भूतदर्शन: ॥

**प्र–२ लङ्कावर्णनं कृत्वा पुष्पकं वर्ण्यताम् । १०**

**अथवा**

**हनुमता कृतं समुद्रलङ्घनं मैनाकेन कृतं स्वगतं सुरसादिवृत्तान्तं वर्णयत ।**

**॥ द्वितीयान्विति: ॥**

**प्र–३ कयोरपि द्वयो: श्लोकयो: ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । १०**

१. अनिवर्वेदो हि सततं सर्वार्थेषु प्रवर्तक: ।
करोति सकलं जन्तो: कर्म यच्च करोति स: ॥

२. मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया ।
यदि सीता हि दु:खार्ता कालो हि दुरतिक्रम: ॥

३. असन्तेशात्तु रामस्य तपसश्चानुपालनात् ।
न त्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसा ॥

**प्र–४ हनुमता लङ्कायां कृतं सीतान्वेषणं विवर्ण्य अशोकवाटिकाप्रवेशं वर्णयत । १०**

**अथवा**

**हनुमता कृता अशोकवाटिकायां सीतादर्शनं विलिख्य हनुमता कृतं सीताया: रूपगुणशीलादीनां वर्णनं कुरुत ।**

**॥ तृतीयान्वितिः ॥**

**प्र-५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । १०**

१. लङ्का दृष्टा यथा स्वप्ने रावणेनाभिरक्षिता ।
दग्धा रामस्य दूतेन वानरेण तपस्विना ॥

२. यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥

३. अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते ।
घातयन्ति हि कार्याणि दूताः मण्डिता मानिनः ॥

**प्र-६ सीतया कृता अशोकवाटिकायां विलापः तथा त्रिजटायाः स्वप्नं वर्णयत । १०**

**अथवा**

**सीतायाः शुकापशुकनविचारं विलिख्य हनुमता कृतं सीताग्रे रामगुणवर्णनं कुरुत ।**

**॥ चतुर्थान्वितिः ॥**

**प्र-७ दशानां लघूत्तराणि लिखत । १०**

१. लङ्का केन देवेन निर्मिता आसीत्?
२. पुष्पकं रावणेन कस्मात् गृहीतम्?
३. रावणस्य पत्न्याः नाम किम्?
४. हनुमत् शब्दस्य द्वितीया बहुवचनं किम्?
५. रावणः सीतायै विचारयितुं कति मासावधिं ददाति?
६. रामायणस्य कर्ता कः ?
७. रामायणे कति श्लोकास्सन्ति?
८. सुन्दरकाण्डे सर्गाणां संख्या का?
९. त्रिजटा शब्दस्य पञ्चमी एकवचनं किम्?
१०. स्नुषा शब्दस्य कोऽर्थः ?
११. हनुमान् रामात् किमाभूषणं गृहीत्वा गच्छति?
१२. हनुमतः पितरौ कौ?
१३. हरिपुङ्गव अर्थात् कः?
१४. सुन्दरे सुन्दरो रामः ......... ॥ श्लोकपूर्तिं कुरुत ।
१५. वाल्मिकि शब्दे षष्ठी एकवचनं किम्?

--००--